# Raghuvansha 11 by Kalidas

# રઘુવંશં સર્ગઃ ૧૧ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha11

File name : raghuvansha11.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : August 05, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# રઘુવંશં સર્ગઃ ૧૧ કાલિદાસકૃતમ્

કૌશિકેન સ કિલ ક્ષિતીશ્વરો રામમધ્વરવિઘાતશાન્તયે ।
કાકપક્ષધરમેત્ય યાચિતસ્તેજસાં હિ ન વયઃ સમીક્ષ્યતે ॥ ૧૧-૧॥

કૃચ્છ્રલબ્ધમપિ લબ્ધવર્ણભાક્તં દિદેશ મુનયે સલક્ષ્મણમ્ ।
અપ્યસુપ્રણયિનાં રઘોઃ કુલે ન વ્યહન્યત કદાચિદર્થિતા ॥ ૧૧-૨॥

યાવદાદિશતિ પાર્થિવસ્તયોર્નિર્ગમાય પુરમાર્ગસંસ્ક્રિયામ્ ।
તાવદાશુ વિદધે મરુત્સખૈઃ સા સપુષ્પજલવર્ષિભિર્ઘનૈઃ ॥ ૧૧-૩॥

તૌ નિદેશકરણોદ્યતૌ પિતુર્ધન્વિનૌ ચરણયોર્નિપેતતુઃ ।
ભૂપતેરપિ તયોઃ પ્રવત્સ્યતોર્નમ્રયોરુપરિ બાષ્પબિન્દવઃ ॥ ૧૧-૪॥

તૌ પિતુર્નયનજેન વારિણા કિંચિદુક્ષિતશિખણ્ડકાવુભૌ ।
ધન્વિનૌ તમૃષિમન્વગચ્છતાં પૌરદૃષ્ટિકૃતમાર્ગતોરણૌ ॥ ૧૧-૫॥

લક્ષ્મણાનુચરમેવ રાઘવં નેતુમૈચ્છદૃષિરિત્યસૌ નૃપઃ ।
આશિષં પ્રયુયુજે ન વાહિનીં સા હિ રક્ષણવિધૌ તયોઃ ક્ષમા ॥ ૧૧-૬॥

માતૃવર્ગચરણસ્પૃશૌ મુનેસ્તૌ પ્રપદ્ય પદવીં મહૌજસઃ ।
રેચતુર્ગતિવશાત્પ્રવર્તિનૌ ભાસ્કરસ્ય મધુમાધવાવિવ ॥ ૧૧-૭॥

વીચિલોલભુજયોસ્તયોર્ગતં શૈશવાચ્ચપલમપ્યશોભત ।
તૂયદાગમ ઇવોદ્ધ્યભિદ્યયોર્નામધેયસદૃશં વિચેષ્ટિતમ્ ॥ ૧૧-૮॥

તૌ બલાતિબલયોઃ પ્રભાવતો વિદ્યયોઃ પથિ મુનિપ્રદિષ્ટયોઃ ।
મમ્લતુર્ન મણિકુટ્ટિમોચિતૌ માતૃપાર્શ્વપરિવર્તિનાવિવ ॥ ૧૧-૯॥

પૂર્વવૃત્તકથિતૈઃ પુરાવિદઃ સાનુજઃ પિતૃસખસ્ય રાઘવઃ ।
ઉહ્યમાન ઇવ વાહનોચિતઃ પાદચારમપિ ન વ્યભાવયત્ ॥ ૧૧-૧૦॥

તૌ સરાંસિ રસવદ્ભિરમ્બુભિઃ કૂજિતૈઃ શ્રુતિસુખૈઃ પતત્રિણઃ ।
વાયવઃ સુરભિપુષ્પરેણુભિશ્છાયયા ચ જલદાઃ સિષેવિરે ॥ ૧૧-૧૧॥

નામ્ભસાં કમલશોભિનાં તથા શાખિનાં ચ ન પરિશ્રમચ્છિદામ્ ।
દર્શનેન લઘુના યથા તયોઃ પ્રીતિમાપુરુભયોસ્તપસ્વિનઃ ॥ ૧૧-૧૨ ॥

સ્થાણુદગ્ધવપુષસ્તપોવનં પ્રાપ્ય દાશરથિરાત્તકાર્મુકઃ ।
વિગ્રહેણ મદનસ્ય ચારુણા સોઽભવત્પ્રતિનિધિર્ન કર્મણા ॥ ૧૧-૧૩ ॥

તૌ સુકેતુસુતયા ખિલીકૃતે કૌશિકાદ્વિદિતશાપયા પથિ ।
નિન્યતુઃ સ્થલનિવેશિતાટની લીલયૈવ ધનુષી અધિજ્યતામ્ ॥ ૧૧-૧૪ ॥

જ્યાનિનાદમથ ગૃહ્ણતી તયોઃ પ્રાદુરાસ બહુલક્ષપાછવિઃ ।
તાડકા ચલકપાલકુણ્ડલા કાલિકેવ નિબિડા બલાકિની ॥ ૧૧-૧૫ ॥

તીવ્રવેગધુતમાર્ગવૃક્ષયા પ્રેતચીવરવસા સ્વનોગ્રયા ।
અભ્યભાવિ ભરતાગ્રજસ્તયા વાત્યયેવ પિતૃકાનનોત્થયા ॥ ૧૧-૧૬ ॥

ઉદ્યતૈકભુજયષ્ટિમાયતીં શ્રોણિલમ્બિપુરુષાન્ત્રમેખલામ્ ।
તાં વિલોક્ય વનિતાવધે ઘૃણાં પત્રિણા સહ મુમોચ રાઘવઃ ॥ ૧૧-૧૭ ॥

યચ્ચકાર વિવરં શિલાઘને તાડકોરસિ સ રામસાયકઃ ।
અપ્રવિષ્ટવિષયસ્ય રક્ષસાં દ્વારતામગમદન્તકસ્ય તત્ ॥ ૧૧-૧૮ ॥

બાણભિન્નહૃદયા નિપેતુષી સા સ્વકાનનભુવં ન કેવલામ્ ।
વિષ્ટપત્રયપરાજયસ્થિરાં રાવણશ્રિયમપિ વ્યકમ્પયત્ ॥ ૧૧-૧૯ ॥

રામમન્મથશરેણ તાડિતા દુઃસહેન હૃદયે નિશાચરી ।
ગન્ધવદ્રુધિરચન્દનોક્ષિતા જીવિતેશવસતિં જગામ સા ॥ ૧૧-૨૦ ॥

નૈરૃતઘ્નમથ મન્ત્રવન્મુનેઃ પ્રાપદસ્ત્રમવદાનતોષિતાત્ ।
જ્યોતિરિન્ધનનિપાતિ ભાસ્કરાત્સૂર્યકાન્ત ઇવ તાડકાન્તકઃ ॥ ૧૧-૨૧ ॥

વામનાશ્રમપદં તતઃ પરં પાવનં શ્રુતમૃષેરુપેયિવાન્ ।
ઉન્મનાઃ પ્રથમજન્મચેષ્ટિતાન્યસ્મરન્નપિ બભૂવ રાઘવઃ ॥ ૧૧-૨૨ ॥

આસસાદ મુનિરાત્મનસ્તતઃ શિષ્યવર્ગપરિકલ્પિતાર્હણમ્ ।
બદ્ધપલ્લવપુટાઞ્જલિદ્રુમં દર્શનોન્મુખમૃગં તપોવનમ્ ॥ ૧૧-૨૩ ॥

તત્ર દીક્ષિતમૃષિં રરક્ષતુર્વિઘ્નતો દશરથાત્મજૌ શરૈઃ ।
લોકમન્ધતમસાત્ક્રમોદિતૌ રશ્મિભિઃ શશિદિવાકરાવિવ ॥ ૧૧-૨૪ ॥

વીક્ષ્ય વેદિમથ રક્તબિન્દુભિર્બન્ધુજીવપૃથુભિઃ પ્રદૂષિતામ્ ।
સંભ્રમોઽભવદપોઢકર્મણામૃત્વિજાં ચ્યુતવિકઙ્કતસ્રુચામ્ ॥ ૧૧-૨૫ ॥

ઉન્મુખઃ સપદિ લક્ષ્મણાગ્રજો બાણમાશ્રયમુખાત્સમુદ્ધરન્ ।
રક્ષસાં બલમપશ્યદમ્બરે ગૃધ્રપક્ષપવનેરિતધ્વજમ્ ॥ ૧૧-૨૬ ॥

તત્ર યાવધિપતી મખદ્વિષાં તૌ શરવ્યમકરોત્સ નેતરાન્ ।
કિં મહોરગવિસર્પિવિક્રમો રાજિલેષુ ગરુડઃ પ્રવર્તતે ॥ ૧૧-૨૭ ॥

સોઽસ્ત્રમુગ્રજવમસ્ત્રકોવિદઃ સંદધે ધનુષિ વાયુદૈવતમ્ ।
તેન શૈલગુરુમપ્યપાતયત્પાણ્ડુપત્રમિવ તાડકાસુતમ્ ॥ ૧૧-૨૮ ॥

યઃ સુબાહુરિતિ રાક્ષસોઽપરસ્તત્ર તત્ર વિસસર્પ માયયા ।
તં ક્ષુરપ્રશકલીકૃતં કૃતી પત્રિણાં વ્યભજદાશ્રમાદ્બહિઃ ॥ ૧૧-૨૯ ॥

ઇત્યપાસ્તમખવિઘ્નયોસ્તયોઃ સાંયુગીનમભિનન્ધ વિક્રમમ્ ।
ઋત્વિજઃ કુલપતેર્યથાક્રમં વાગ્યતસ્ય નિરવર્તયન્ક્રિયાઃ ॥ ૧૧-૩૦ ॥

તૌ પ્રણામચલકાકપક્ષકૌ ભ્રાતરાવવભૃથાપ્લુતો મુનિઃ ।
આશિષામનુપદં સમસ્પૃશદ્દર્ભપાટલતલેન પાણિના ॥ ૧૧-૩૧ ॥

તં ન્યમન્ત્રયત સંભૃતક્રતુર્મૈથિલઃ સ મિથિલાં વ્રજન્વશી ।
રાઘવાવપિ નિનાય બિભ્રતૌ તદ્ધનુઃશ્રવણજં કુતૂહલમ્ ॥ ૧૧-૩૨ ॥

તૈઃ શિવેષુ વસતિર્ગતાધ્વભિઃ સાયમાશ્રમતનુષ્વગૃહ્યત ।
યેષુ દીર્ઘતપસઃ પરિગ્રહો વાસવક્ષણકલત્રતાં યયૌ ॥ ૧૧-૩૩ ॥

પ્રત્યપદ્યત ચિરાય યત્પુનશ્ચારુ ગૌતમવધૂઃ શિલામયી ।
સ્વં વપુઃ સ કિલ કિલ્બિષચ્છિદાં રામપાદરજસામનુગ્રહઃ ॥ ૧૧-૩૪ ॥

રાઘવાન્વિતમુપસ્થિતં મુનિં તં નિશમ્ય જનકો જનેશ્વરઃ ।
અર્થકામસહિતં સપર્યયા દેહબદ્ધમિવ ધર્મમભ્યગાત્ ॥ ૧૧-૩૫ ॥

તૌ વિદેહનગરીનિવાસિનાં ગાં ગતાવિવ દિવઃ પુનર્વસૂ ।
મન્યતે સ્મ પિબતાં વિલોચનૈઃ પક્ષ્મપાતમપિ વઞ્ચનાં મનઃ ॥ ૧૧-૩૬ ॥

યૂપવત્યવસિતે ક્રિયાવિધૌ કાલવિત્કુશિકવંશવર્ધનઃ ।
રામમિષ્વસનદર્શનોત્સુકં મૈથિલાય કથયાંબભૂવ સઃ ॥ ૧૧-૩૭ ॥

તસ્ય વીક્ષ્ય લલિતં વપુઃ શિશોઃ પાર્થિવઃ પ્રથિતવંશજન્મનઃ ।
સ્વં વિચિન્ત્ય ચ ધનુર્દુરાનમં પીડિતો દુહિતૃશુલ્કસંસ્થયા ॥ ૧૧-૩૮ ॥

અબ્રવીચ્ચ ભગવન્મતઙ્ગજૈર્યદ્બૃહદ્ભિરપિ કર્મ દુષ્કરમ્ ।

તત્ર નાહમનુમન્તુમુત્સહે મોક્ષવૃત્તિ કલભસ્ય ચેષ્ટિતમ્ ॥ ૧૧-૩૯॥

હ્રેપિતા હિ બહવો નરેશ્વરાસ્તેન તાત ધનુષા ધનુર્ભૃતઃ ।
જ્યાનિઘાતકઠિનત્વચો ભુજાન્સ્વાન્વિધૂય ધિગિતિ પ્રતસ્થિરે ॥ ૧૧-૪૦॥

પ્રત્યુવાચ તમૃષિર્નિશમ્યતાં સારતોઽયમથવા ગિરા કૃતમ્ ।
ચાપ એવ ભવતો ભવિષ્યતિ વ્યક્તશક્તિરશનિર્ગિરાવિવ ॥ ૧૧-૪૧॥

એવમાપ્તવચનાત્સ પૌરુષં કાકપક્ષકધરેઽપિ રાઘવે ।
શ્રદ્દધે ત્રિદશગોપમાત્રકે દાહશક્તિમિવ કૃષ્ણવર્ત્મનિ ॥ ૧૧-૪૨॥

વ્યાદિદેશ ગણશોઽથ પાર્શ્વગાન્કાર્મુકાભિહરણાય મૈથિલઃ ।
તૈજસસ્ય ધનુષઃ પ્રવૃત્તયે તોયદાનિવ સહસ્રલોચનઃ ॥ ૧૧-૪૩॥

તત્પ્રસુપ્તભુજગેન્દ્રભીષણં વીક્ષ્ય દાશરથિરાદદે ધનુઃ ।
વિદ્રુતક્રતુમૃગાનુસારિણં યેન બાણમસૃજત્વૃષધ્વજઃ ॥ ૧૧-૪૪॥

આતતજ્યમકરોત્સ સંસદા વિસ્મયસ્તિમિતનેત્રમીક્ષિતઃ ।
શૈલસારમપિ નાતિયત્નતઃ પુષ્પચાપમિવ પેશલં સ્મરઃ ॥ ૧૧-૪૫॥

ભજ્યમાનમતિમાત્રકર્ષણાત્તેન વજ્રપરુષસ્વનં ધનુઃ ।
ભાર્ગવાય દૃઢમન્યવે પુનઃ ક્ષત્રમુદ્યતમિવ ન્યવેદયત્ ॥ ૧૧-૪૬॥

દૃષ્ટસારમથ રુદ્રકાર્મુકે વીર્યશુલ્કમભિનન્દ્ય મૈથિલઃ ।
રાઘવાય તનયામયોનિજાં રૂપિણીં શ્રિયમિવ ન્યવેદયત્ ॥ ૧૧-૪૭॥

મૈથિલઃ સપદિ સત્યસંગરો રાઘવાય તનયામયોનિજામ્ ।
સંનિધૌ દ્યુતિમતસ્તપોનિધેરગ્નિસાક્ષિક ઇવાતિસૃષ્ટવાન્ ॥ ૧૧-૪૮॥

પ્રાહિણોચ્ચ મહિતં મહાદ્યુતિઃ કોસલાધિપતયે પુરોધસમ્ ।
ભૃત્યભાવિ દુહિતુઃ પરિગ્રહાદ્દિશ્યતાં કુલમિદં નિમેરિતિ ॥ ૧૧-૪૯॥

અન્વિયેષ સદૃશીં સ ચ સ્નુષાં પ્રાપ ચૈનમનુકૂલવાગ્દ્વિજઃ ।
સદ્ય એવ સુકૃતાં હિ પચ્યતે કલ્પવૃક્ષફલધર્મિ કાઙ્ક્ષિતમ્ ॥ ૧૧-૫૦॥

તસ્ય કલ્પિતપુરસ્ક્રિયાવિધેઃ શુશ્રુવાન્વચનમગ્રજન્મનઃ ।
ઉચ્ચચાલ બલભિત્સખો વશી સૈન્યરેણુમુષિતાર્કદીધિતિઃ ॥ ૧૧-૫૧॥

આસસાદ મિથિલાં સ વેષ્ટયન્પીડિતોપવનપાદપાં બલૈઃ ।
પ્રીતિરોધમસહિષ્ટ સા પુરી સ્ત્રીવ કાન્તપરિભોગમાયતમ્ ॥ ૧૧-૫૨॥

તૌ સમેત્ય સમયે સ્થિતાવુભૌ ભૂપતી વરુણવાસવોપમૌ ।
કન્યકાતનયકૌતુકક્રિયાં સ્વપ્રભાવસદૃશીં વિતેનતુઃ ॥ ૧૧-૫૩ ॥

પાર્થિવીમુદવહદ્રઘૂદ્વહો લક્ષ્મણસ્તદનુજામથોર્મિલામ્ ।
યૌ તયોરવરજૌ વરૌજસૌ તૌ કુશધ્વજસુતે સુમધ્યમે ॥ ૧૧-૫૪ ॥

તે ચતુર્થસહિતાસ્ત્રયો બભુઃ સૂનવો નવવધૂપરિગ્રહાઃ ।
સામદાનવિધિભેદનિગ્રહાઃ સિદ્ધિમન્ત ઇવ તસ્ય ભૂપતેઃ ॥ ૧૧-૫૫ ॥

તા નરાધિપસુતા નૃપાત્મજૈસ્તે ચ તાભિરગમન્કૃતાર્થતામ્ ।
સોઽભવદ્વરવધૂસમાગમઃ પ્રત્યયપ્રકૃતિયોગસંનિભઃ ॥ ૧૧-૫૬ ॥

એવમાત્તરતિરાત્મસંભવાંસ્તાન્નિવેશ્ય ચતુરોઽપિ તત્ર સઃ ।
અધ્વસુ ત્રિષુ વિસૃષ્ટમૈથિલઃ સ્વાં પુરીં દશરથો ન્યવર્તત ॥ ૧૧-૫૭ ॥

તસ્ય જાતુ મરુતઃ પ્રતીપગા વર્ત્મસુ ધ્વજતરુપ્રમાથિનઃ ।
ચિક્લિશુર્ભૃશતયા વરૂથિનીમુત્તટા ઇવ નદીરયાઃ સ્થલીમ્ ॥ ૧૧-૫૮ ॥

લક્ષ્યતે સ્મ તદનન્તરં રવિર્બદ્ધભીમપરિવેષમણ્ડલઃ ।
વૈનતેયશમિતસ્ય ભોગિનો ભોગવેષ્ટિત ઇવ ચ્યુતો મણિઃ ॥ ૧૧-૫૯ ॥

શ્યેનપક્ષપરિધૂસરાલકાઃ સાંધ્યમેઘરુધિરાર્દ્રવાસસઃ ।
અઙ્ગના ઇવ રજસ્વલા દિશો નો બભૂવુરવલોકનક્ષમાઃ ॥ ૧૧-૬૦ ॥

ભાસ્કરશ્ચ દિશમધ્યુવાસ યાં તાં શ્રિતાઃ પ્રતિભયં વવાસિરે ।
ક્ષત્રશોણિતપિતૃક્રિયોચિતં ચોદયન્ત્ય ઇવ ભાર્ગવં શિવાઃ ॥ ૧૧-૬૧ ॥

તત્પ્રતીપપવનાદિવૈકૃતં પ્રેક્ષ્ય શાન્તિમધિકૃત્ય કૃત્યવિદ્ ।
અન્વયુઙ્ક્ત ગુરુમીશ્વરઃ ક્ષિતેઃ સ્વન્તમિત્યલઘયત્સ તદ્વ્યથામ્ ॥ ૧૧-૬૨ ॥

તેજસઃ સપદિ રાશિરુત્થિતઃ પ્રાદુરાસ કિલ વાહિનીમુખે ।
યઃ પ્રમૃજ્ય નયનાનિ સૈનિકૈર્લક્ષણીયપુરુષાકૃતિશ્ચિરાત્ ॥ ૧૧-૬૩ ॥

પિત્ર્યવંશમુપવીતલક્ષણં માતૃકં ચ ધનુરૂર્જિતં દધત્ ।
યઃ સસોમ ઇવ ઘર્મદીધિતિઃ સદ્વિજિહ્વ ઇવ ચન્દનદ્રુમઃ ॥ ૧૧-૬૪ ॥

યેન રોષપરુષાત્મનઃ પિતુઃ શાસને સ્થિતિભિદોઽપિ તસ્થુષા ।
વેપમાનજનનીશિરશ્છિદા પ્રાગજીયત ઘૃણા તતો મહી ॥ ૧૧-૬૫ ॥

અક્ષબીજવલયેન નિર્બભૌ દક્ષિણશ્રવણસંસ્થિતેન યઃ ।
ક્ષત્રિયાન્તકરણૈકવિંશતેર્વ્યાજપૂર્વગણનામિવોદ્વહન્ ॥ ૧૧-૬૬ ॥

તં પિતુર્વધભવેન મન્યુના રાજવંશનિધનાય દીક્ષિતમ્ ।
બાલસૂનુરવલોક્ય ભાર્ગવં સ્વાં દશાં ચ વિષસાદ પાર્થિવઃ ॥ ૧૧-૬૭॥

નામ રામ ઇતિ તુલ્યમાત્મજે વર્તમાનમહિતે ચ દારુણે ।
હૃદ્યમસ્ય ભયદાયિ ચાભવદ્રત્નજાતમિવ હારસર્પયોઃ ॥ ૧૧-૬૮॥

અર્ઘ્યમર્ઘ્યમિતિ વાદિનં નૃપં સોઽનવેક્ષ્ય ભરતાગ્રજો યતઃ ।
ક્ષત્રકોપદહનાર્ચિષં તતઃ સંદધે દૃશમુદગ્રતારકામ્ ॥ ૧૧-૬૯॥

તેન કાર્મુકનિષક્તમુષ્ટિના રાઘવો વિગતભીઃ પુરોગતઃ ।
અઙ્ગુલીવિવરચારિણં શરં કુર્વતા નિજગદે યુયુત્સુના ॥ ૧૧-૭૦॥

ક્ષત્રજાતમપકારવૈરિ મે તન્નિહત્ય બહુશઃ શમં ગતઃ ।
સુપ્તસર્પ ઇવ દણ્ડઘટ્ટનાદ્રોષિતોઽસ્મિ તવ વિક્રમશ્રવાત્ ॥ ૧૧-૭૧॥

મૈથિલસ્ય ધનુરન્યપાર્થિવૈસ્ત્વં કિલાનમિતપૂર્વમક્ષણોઃ ।
તન્નિશમ્ય ભવતા સમર્થયે વીર્યશૃઙ્ગમિવ ભગ્નમાત્મનઃ ॥ ૧૧-૭૨॥

અન્યદા જગતિ રામ ઇત્યયં શબ્દ ઉચ્ચરિત એવ મામગાત્ ।
વ્રીડમાવહતિ મે સ સંપ્રતિ વ્યસ્તવૃત્તિરુદયોન્મુખે ત્વયિ ॥ ૧૧-૭૩॥

બિભ્રતોઽસ્ત્રમચલેઽપ્યકુણ્ઠિતં દ્વૌ રુપૂ મમ મતૌ સમાગસૌ ।
ધેનુવત્સહરણાચ્ચ હૈહયસ્ત્વં ચ કીર્તિમપહર્તુમુદ્યતઃ ॥ ૧૧-૭૪॥

ક્ષત્રિયાન્તકરણોઽપિ વિક્રમસ્તેન મામવતિ નાજિતે ત્વયિ ।
પાવકસ્ય મહિમા સ ગણ્યતે કક્ષવજ્જ્વલતિ સાગરેઽપિ યઃ ॥ ૧૧-૭૫॥

વિદ્ધિ ચાત્તબલમોજસા હરેરૈશ્વરં ધનુરભાજિ યત્ત્વયા ।
ખાતમૂલમનિલો નદીરયૈઃ પાતયત્યપિ મૃદુસ્તટદ્રુમમ્ ॥ ૧૧-૭૬॥

તન્મદીયમિદમાયુધં જ્યયા સંગમય્ય સશરં વિકૃષ્યતામ્ ।
તિષ્ઠતુ પ્રધવમેવમપ્યહં તુલ્યબાહુતરસા જિતસ્ત્વયા ॥ ૧૧-૭૭॥

કાતરોઽસિ યદિ વોદ્ગતાર્ચિષા તર્જિતઃ પરશુધારયા મમ ।
જ્યાનિઘાતકઠિનાઙ્ગુલિર્વૃથા બધ્યતામભયયાચનાઞ્જલિઃ ॥ ૧૧-૭૮॥

એવમુક્તવતિ ભીમદર્શને ભાર્ગવે સ્મિતવિકમ્પિતાધરઃ ।
તદ્ધનુર્ગ્રહણમેવ રાઘવઃ પ્રત્યપદ્યત સમર્થમુત્તરમ્ ॥ ૧૧-૭૯॥

પૂર્વજન્મધનુષા સમાગતઃ સોઽતિમાત્રલઘુદર્શનોઽભવત્ ।

કેવલોઽપિ સુભગો નવામ્બુદઃ કિં પુનસ્ત્રિદશચાપલાઞ્છિતઃ ॥ ૧૧-૮૦॥

તેન ભૂમિનિહિતૈકકોટિ તત્કાર્મુકં ચ બલિનાધિરોપિતમ્ ।
નિષ્પ્રભશ્ચ રિપુરાસ ભૂભૃતાં ધૂમશેષ ઇવ ધૂમકેતનઃ ॥ ૧૧-૮૧॥

તાવુભાવપિ પરસ્પરસ્થિતૌ વર્ધમાનપરિહીનતેજસૌ ।
પશ્યતિ સ્મ જનતા દિનાત્યયે પાર્વણૌ શશિદિવાકરાવિવ ॥ ૧૧-૮૨॥

તં કૃપામુદુરવેક્ષ્ય ભાર્ગવં રાઘવઃ સ્ખલિતવીર્યમાત્મનિ ।
સ્વં ચ સંહિતમમોઘમાશુગં વ્યાજહાર હરસૂનુસંનિભઃ ॥ ૧૧-૮૩॥

ન પ્રહર્તુમલમસ્મિ નિર્દયં વિપ્ર ઇત્યભિભવત્યપિ ત્વયિ ।
શંસ કિં ગતિમનેન પત્રિણા હન્મિ લોકમુત તે મખાર્જિતમ્ ॥ ૧૧-૮૪॥

પ્રત્યુવાચ તમૃષિર્ન તત્ત્વતસ્ત્વાં ન વેદ્મિ પુરુષં પુરાતનમ્ ।
ગાં ગતસ્ય તવ ધામ વૈષ્ણવં કોપિતો હ્યસિ મયા દિદૃક્ષુણા ॥ ૧૧-૮૫॥

ભસ્મસાત્કૃતવતઃ પિતૃદ્વિષઃ પાત્રસાચ્ચ વસુધાં સસાગરામ્ ।
આહિતો જયવિપર્યયોઽપિ મે શ્લાઘ્ય એવ પરમેષ્ઠિના ત્વયા ॥ ૧૧-૮૬॥

તદ્ગતિં મતિમતાં વરેપ્સિતાં પુણ્યતીર્થગમનાય રક્ષ મે ।
પીડયિષ્યતિ ન માં ખિલીકૃતા સ્વર્ગપદ્ધતિરમોઘલોલુપમ્ ॥ ૧૧-૮૭॥

પ્રત્યપદ્યત તથેતિ રાઘવઃ પ્રાઙ્મુખશ્ચ વિસસર્જ સાયકમ્ ।
ભાર્ગવસ્ય સુકૃતોઽપિ સોઽભવત્સ્વર્ગમાર્ગપરિઘો દુરત્યયઃ ॥ ૧૧-૮૮॥

રાઘવોઽપિ ચરણૌ તપોનિધેઃ ક્ષમ્યતામિતિ વદન્સમસ્પૃશત્ ।
નિર્જિતેષુ તરસા તરસ્વિનાં શત્રુષુ પ્રણતિરેવ કીર્તયે ॥ ૧૧-૮૯॥

રાજસત્વમવધૂય માતૃકં પિત્ર્યમસ્મિ ગમિતઃ શમં યદા ।
નન્વનિન્દિતફલો મમ ત્વયા નિગ્રહોઽપ્યયમનુગૃહીકૃતઃ ॥ ૧૧-૯૦॥

સાધયામ્યહમવિઘ્નમસ્તુ તે દેવકાર્યમુપપાદયિષ્યતઃ ।
ઊચિવાનિતિ વચઃ સલક્ષ્મણં લક્ષ્મણાગ્રજમૃષિતિરોદધે ॥ ૧૧-૯૧॥

તસ્મિન્ગતે વિજયિનં પરિરભ્ય રામં
સ્નેહાદમન્યત પિતા પુનરેવ જાતમ્ ।
તસ્યાભવત્ક્ષણશુચઃ પરિતોષલાભઃ
કક્ષાગ્નિલઙ્ઘિતતરોરિવ વૃષ્ટિપાતઃ ॥ ૧૧-૯૨॥

અથ પથિ ગમયિત્વા કૢપ્તરમ્યોપકાર્યે

કતિચિદવનિપાલઃ શર્વરીઃ શર્વકલ્પઃ ।
પુરમવિશદયોધ્યાં મૈથિલીદર્શનીનાં
કુવલયિતગવાક્ષાં લોચનૈરઙ્ગનાનામ્ ॥ ૧૧-૯૩॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
સીતવિવાહવર્ણનો નામૈકાદશઃ સર્ગઃ ॥

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

---

*Raghuvansha 11 by Kalidas*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*